International Journal of Sanskrit Research 2022; 8(2): 75-77

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 75-77
© 2022 IJSR
www.anantaajournal.com
Received: 16-11-2021
Accepted: 20-12-2021

**Dr. Asavadi Sudhama Vamsi**
Lecturer In Sanskrit, Gdc – M - (A), Anantapuram, Andhra Pradesh, India

# सर्ववर्णानां साधारणधर्माः

## Dr. Asavadi Sudhama Vamsi

**सारांश:**
कृष्णयजुर्वेदस्य प्रमुखेषु त्रिषु धर्मसूत्रेषु बोधायनापस्तम्बहिरण्यकेशिग्रन्थाः अनेकानेक मानवीयमूल्यसम्बद्धाम्शान् उत्घोषितवन्तः तेषु सर्ववर्णानां साधारणधर्माः अत्यन्त मुख्या इति वक्तुं शक्यते। साधारणधर्मा चरणेनैव एव मानवः तस्य जन्म परिपूर्णत्वं प्राप्नोति इति पण्डिताणां अभिप्रायः।

**1.** वर्णव्यवस्था: कृष्णयजुर्वेदस्य प्रमुखेषु त्रिषु धर्मसूत्रेषु वर्णव्यवस्था सम्यक् निरूपिता। धर्मसूत्रेष्वेषु वर्णानां विभागः, सर्ववर्णानां साधारणधर्माः, ब्राह्मणक्षत्रियवैश्यशूद्राणाञ्च धर्माः विशेषरूपेण चर्चितास्सन्ति।

**2.** वर्णविभागः आर्यसमाजः वर्णदृष्ट्या चतुर्धा विभक्तः इति विदितचरमेव। अनूचानः सोऽयं वर्णविभागः कृष्णयुजुर्वेदस्य प्रमुखेषु त्रिषु धर्मसूत्रेषु प्रोक्तो वर्तते-

चत्वारो वर्णा ब्राह्मणक्षत्रियविट्शूद्राः[1] इति बोधायने चत्वारो वर्णा ब्रह्मणक्षत्रियवैश्यशूद्राः [2] इति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः वर्णविभागः प्रादर्शि। एते चत्वारो वर्णाः सामयाचारिकधर्मस्याधिकारिणः भवन्ति [3], नान्ये। किञ्च, आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः वर्णानामेषां ब्राह्मणादीनां पूर्वः पूर्वः सद्वृत्तवतोऽपि अपरात् जन्मतः श्रेष्ठत्वं प्रतिपादितम्- तेषां पूर्वः पूर्वो जन्मतश्श्रेयान् [4] इति।

**3.** सर्ववर्णानां साधारणधर्माः आपस्तम्बहिरण्यकेशिधर्मसूत्रयोरुभयोरपि सर्ववर्णानां साधारण धर्माः यथा अहिंसा सत्यमस्तेयादयः, विशेषधर्माः यथा अध्ययनादयः त्रयाणां ब्राह्मणक्षत्रियवैश्यानां, अध्यापनादयो ब्राह्मणस्य, युद्धादयः क्षत्रियस्य, कृष्यादयो वैश्यस्येत्यादयः प्रतिपादिताः। दुष्कर्म न करणीयमिति - दोषफलसंशये न तत् कर्तव्यम् [5], पात्रदानमेव कर्तव्यमिति - देशतः कालतः शौचतः सम्यक्प्रतिगृहीतृत इति दानानि प्रतिपादयति [6] इति।, अतिथिपूजनं कार्यमिति, पुण्यापुण्यकर्मानुगुण्येन जन्मान्तरप्राप्तिरिति, मार्गे केचन धर्माः पालनीयाः - यानस्य भाराभिनिहितस्याऽऽतुरस्य स्त्रिया इति सर्वैर्दातव्यः [7], अशिष्टपतितमत्तोन्मत्तानामात्मस्वस्त्ययनार्थेन सर्वैरेव दातव्यः [8], वर्णज्यायसां चेतरैर्वर्णैः [9], धर्मप्रजासम्पन्ने दारे नान्यां कुर्वीत, अन्यतराभावे कार्या प्रागग्न्याधेयात् [10], न संशये प्रत्यक्षवद् ब्रूयात् [11] इत्यादयः अंशाः सर्ववर्णानां साधारणधर्माङ्गत्वेनोक्ताः। सम्प्रति एते सर्ववर्णानां साधारणधर्माः प्रदर्श्यन्ते।

**कूट शब्द:** कृष्णयजुर्वेदस्य, अध्यापनादयो ब्राह्मणस्य, युद्धादयः क्षत्रियस्य

## प्रस्तावना

"भारतस्य प्रतिष्टे द्वे संस्कृतं संस्कृतिस्तथा" इत्यभियुक्तोक्तिमाधारीकृत्य संस्कृतभाषा, भारतीयसंस्कृतिः च अत्यन्त प्राचीन इति निश्चप्रचं वचः। देवता व्यवहारयोग्यत्वात् संस्कृतभाषा देवभाषा इत्यभिप्रधिता। दिव् धातोः द्योतनमित्यर्थः कस्य द्योतनं इत्याकांक्षायाम् आत्मसंस्कारद्योतनमिति समाधेयम्। यतोहि "वाण्येका समलंङ्करोति पुरुषं या संस्कृता धार्यते, "वाक् वैदोग्ध्री" --------"धेनुर्वागस्मान् उपसुष्टुतैतु इत्यादि प्रामाण्यवचनानि संस्कृतभाषायाः, संस्कृतेश्च अविनाभावसम्बन्धः ख्यापयन्ति।

वैदिककालादारभ्य आधुनिककालपर्यन्तं संस्कृतभाषा गंङ्गादिपुण्यजीवनदीव आसंसारम् अस्मान् पुणति। एतादृश महत्वपूर्णायाः संस्कृतभाषायाः उज्जीवनाय, परिरक्षणाय बद्धपरिकरास्ताः महाभागाः नित्यस्मरणीयाः भवन्ति वाल्मीकिव्यासादयः।

**Corresponding Author:**
**Dr. Asavadi Sudhama Vamsi**
Lecturer In Sanskrit, Gdc – M - (A), Anantapuram, Andhra Pradesh, India

मानवीयबंधसहितस्य, आत्मीयतासहितस्य मानवीयमूलस्य केन्द्रस्थानं समाज एवेति सर्वेषां अङ्गीकार एव। तादृश मानवीयबन्धान् समाजे उद्धर्तुमेव वेदाः, उपनिषदः, काव्यानि नाटकानि अजायन्त। तेषु वेदाः वेदसम्बद्धाः धर्मशास्त्र, धर्मसूत्रग्रन्थाः अत्यन्त सन्निहिततया मानवीय अनुबंधदृष्ट्या सर्ववर्णानां साधारणधर्माः आचरणयोग्यानि बहूनि विषयानि कथं बोधयन्ति? कथं उपदिशन्ति? कथं प्रचारं लभन्ते? इत्यादि विषयक चर्चा मया अत्र विस्तार्यते।

कृष्णयजुर्वेदस्य प्रमुखेषु त्रिषु धर्मसूत्रेषु बोधायनापस्तम्बहिरण्यकेशिग्रन्थाः अनेकानेक मानवीयमूल्यसम्बद्धाम्शान् उत्घोषितवन्तः तेषु सर्ववर्णानां साधारणधर्माः अत्यन्त मुख्या इति वक्तुं शक्यते। साधारणधर्मा चरणेनैव एव मानवः तस्य जन्म परिपूर्णत्वं प्राप्नोति इति पण्डिताणां अभिप्रायः।

### 1. वर्णव्यवस्था

कृष्णयजुर्वेदस्य प्रमुखेषु त्रिषु धर्मसूत्रेषु वर्णव्यवस्था सम्यक् निरूपिता। धर्मसूत्रेष्वेषु वर्णानां विभागः, सर्ववर्णानां साधारणधर्माः, ब्राह्मणक्षत्रियवैश्यशूद्रानाञ्च धर्माः विशेषरूपेण चर्चितास्सन्ति।

सामयाचारिकधर्मस्याधिकारित्वेन चतुर्णां वर्णानां विभागः ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः इति रूपेण कृतः। सर्ववर्णानां साधारणधर्माङ्गत्वेन दुष्कर्म न करणीयमिति, पात्रदानमेव कर्तव्यमिति, मार्गे केचन धर्माः पालनीयाः इति। अतिथिपूजनं च कार्यमित्यादयः धर्माः प्रोक्ताः। ब्राह्मणधर्माङ्गत्वेन ब्राह्मणस्य कर्माणि, ब्राह्मणस्य दैनन्दिनवर्तनं, ब्राह्नजीविकेत्यादयोंऽशाः चर्चिताः। क्षत्रियधर्माङ्गत्वेन क्षत्रियधर्माः, क्षत्रियेण पालनीयाः युद्धधर्माः राज्यपालनधर्माश्च प्रोक्ताः वर्तन्ते।

वैश्यधर्माङ्गत्वेन वैश्यस्य धर्मसम्मतानि कर्माणि, वैश्यस्यजीविका इत्यादयोंऽशाः उपवर्णिताः। शूद्रधर्माङ्गत्वेन त्रैवर्णिकानां शुश्रूषैव विहिता। उपनयनं, वेदाध्ययनं, यज्ञमित्यादीनि कर्माणि शूद्राय न विहितानि। त्रैवर्णिकानां शुश्रूषैव जीविकात्वेनोपवर्णिता। एवमेतेंऽशाः बोधायनापस्तम्बहिरण्यकेशि धर्मसूत्रेषु निरूपिताः। साम्प्रतमेतेंऽशाः यथाक्रमं निरूप्यन्ते।

### 2. वर्णविभागः

आर्यसमाजः वर्णदृष्ट्या चतुर्धा विभक्तः इति विदितचरमेव। अनूचानः सोऽयं वर्णविभागः कृष्णयुजुर्वेदस्य प्रमुखेषु त्रिषु धर्मसूत्रेषु प्रोक्तो वर्तते–

चत्वारो वर्णा ब्राह्मणक्षत्रियविट्शूद्राः [1] इति बोधायने चत्वारो वर्णा ब्रह्मणक्षत्रियवैश्यशूद्राः [2] इति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः वर्णविभागः प्रादर्शि। एते चत्वारो वर्णाः सामयाचारिकधर्मस्याधिकारिणः *भवन्ति* [3], नान्ये। किञ्च, आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः वर्णानामेषां ब्राह्मणादीनां पूर्वः पूर्वः सद्वृत्तवतोऽपि अपरात् जन्मतः श्रेष्ठत्वं प्रतिपादितम्– तेषां पूर्वः पूर्वो जन्मतश्श्रेयान् [4] इति।

एवं सद्वृत्तवतोऽपि शूद्रात् वैश्यः, वैश्यात् क्षत्रियः, क्षत्रियात् ब्राह्मणः श्रेयानिति सिध्यति। इत्थमत्र ब्राह्मणस्य सर्वश्रेष्ठता जन्मतः एव उक्ता- किञ्च ब्राह्मण एव सर्वेषामाचार्यः स्मर्यते धर्मशास्त्रेषु [5] इति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रस्तुतः– ब्राह्मण आचार्यः स्मर्यते तु [6] इति। एवं चत्वारः वर्णाः, तत्र ब्राह्मणः, श्रेष्ठः इति धर्मसूत्रेषु निरूपितम्।

### 3. सर्ववर्णानां साधारणधर्माः

कृष्णयजुर्वेदस्य प्रमुखेषु त्रिषु बोधायनापस्तम्बहिरण्यकेशि-धर्मसूत्रेषु बोधायनधर्मसूत्रं विहाय अन्ययोः धर्मसूत्रयोः द्वयोः सर्ववर्णानां साधारणधर्माः विशेषरूपेण उपवर्णिताः।

आपस्तम्बहिरण्यकेशिधर्मसूत्रयोरुभयोरपि सर्ववर्णानां साधारण धर्माः यथा अहिंसा सत्यमस्तेयादयः, विशेषधर्माः यथा अध्ययनादयः त्रयाणां ब्राह्मणक्षत्रियवैश्यानां, अध्यापनादयो ब्राह्मणस्य, युद्धादयः क्षत्रियस्य, कृष्यादयो वैश्यस्येत्यादयः प्रतिपादिताः। दुष्कर्म न करणीयमिति, पात्रदानमेव कर्तव्यमिति, अतिथिपूजनं कार्यमिति, पुण्यापुण्यकर्मानुगुण्येन जन्मान्तरप्राप्तिरिति, मार्गे केचन धर्माः पालनीयाः इत्यादयः अंशाः सर्ववर्णानां साधारणधर्माङ्गत्वेनोक्ताः। सम्प्रति एते सर्ववर्णानां साधारणधर्माः प्रदर्श्यन्ते।

#### 1. दुष्कर्म नैव करणीयम्

दुष्कर्म नैव करणीयमिति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रस्तूयते दोषफलसंशये न तत् कर्तव्यम् [7] इति। अर्थात् यस्मिन् कर्मणि कृते दुष्टफलं सम्भाव्यते न तत्कर्म कुर्यात् इति भावः। एतेन जनः दुष्टकर्मणः दूरे तिष्ठति।

#### 2. पात्रदानमेव कर्तव्यम्

दानविषयेऽपि महदवधानम् आपस्तम्बेन प्रदत्तमासीत्। प्रयागादिक्षेत्रेषु, सूर्यग्रहणादिकालेषु, कृच्छ्रादिपरिसमाप्त्यादिपवित्रेषु अवसरेषु च अवश्यं दानानि देयानीति, तद्दानमपि योग्यप्रतिग्रहीत्रे एव करणीयमिति च आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रतिपादितः। अर्थात् पात्रदानमेव करणीयमिति संसूच्यते– देशतः कालतः शौचतः सम्यक्प्रतिगृहीतृत इति दानानि प्रतिपादयति [8] इति। एवमत्र पात्रदानमेवकरणीयमिति प्रतिपादितम्।

#### 3. अतिथिपूजा कार्या

अतिथिपूजनं कार्यमिति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः संसूच्यते। यस्यान्नस्य एकदेशः अग्नौ न हूयते न समर्प्यते, यस्मात् अन्नात् किञ्चन भागं अतिथये न दीयते तादृगन्नं न

भोक्तव्यमित्यादिना अतिथये अन्नसमर्पणानन्तरमेव स्वयं भोक्तव्यमिति निर्दिश्यते। एवमत्र अतिथिपूजनम् अवश्यं कार्यमेवेति सूच्यते- यस्याऽनौ न क्रियते यस्य चाऽग्रं न दीयते न तद्भोक्तव्यम् [9] इति।

## 4. पुण्यापुण्यकर्मानुगुण्येन जन्मान्तरप्राप्तिः

पुण्यापुण्यकर्मानुगुण्येन जन्मान्तरप्राप्तिः भवतीति आपस्तम्बहिरण्यकेशि- धर्मसूत्रयोः प्रतिपादितम्। सर्ववर्णानां ये वर्णप्रयुक्ताः आश्रमप्रयुक्ता उभयप्रयुक्ता वा स्वधर्माः प्रोक्तास्तेषां अवैगुण्येन अनुष्ठाने सति उत्कृष्टम् अक्षयं स्वर्गाख्ये लोके वासः भवतीति, तत्र सुखानुभवानन्तरं, अवशिष्टकर्मफलेन पुनरत्र विशिष्टे कुले जन्म, कान्तिमद्रूपं हेमादितुल्यं वर्णं, प्रतिपक्षनिग्रहक्षमं बलं, मेधां, प्रज्ञां, स्वर्णादीनि द्रव्याणि च लभन्ते इति च तत्र प्रतिपादितम्– सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम्, धर्मानुष्ठानमिति प्रतिपद्यते तच्चक्रददुभयोर्लोकयोः सुख एव [10] इति। एवमेव स्वधर्मस्य अननुष्ठानात् दुःखप्राप्तिर्भवतीत्यपि सूचिता वर्तते– एतेन दोषफलपरिवृद्धिरुक्ता [11] इति। एवमत्र स्वधर्मानुष्ठानस्य महत्वमुपवर्णितम्।

किञ्च धर्मानुष्ठानेन जघन्यः वर्णः शूद्रादिः पूर्वं पूर्वं वर्णत्वम् आपद्यते इति, अधर्मानुष्ठानेन पूर्वो वर्णः जघन्यं वर्णमापद्यते इति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः अन्यत्रापि सूचितम्। अर्थात् धर्मानुष्ठानात् उत्तमवर्णत्वप्राप्तिः, तदननुष्ठानाच्च अवरवर्णत्वप्राप्तिरिति भावः– धर्मचर्यया जघन्यो वर्णः पूर्वपूर्वं वर्णमापद्यते जातिपरिवृत्तौ, अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जाति परिवृत्तौ [12] इति।

## 5. मार्गे पालनीयाः धर्माः

स्वस्य परस्य च हिताय, सुखाय च मार्गे अवश्यं पालनीयाश्च धर्माः केचन आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रोक्ताः। यानाय, व्याधिपीडिताय, स्त्रीभ्यः, वृद्धाय, दुर्बलाय, बालाय च गन्तुं सर्वैरेव वर्णैः मार्गः दातव्यः– यानस्य भाराभिनिहितस्याऽऽतुरस्य स्त्रिया इति सर्वैर्दातव्यः [13] इति।

सर्वैः वर्णैः आत्मश्रेयसे, आत्मत्राणाय च अशिष्टानां मूर्खाणां, पतितानां, मत्तानाम्, उन्मत्तानाम् प्रथमं गन्तुं मार्गः दातव्यः- अशिष्टपतितमत्तोन्मत्तानामात्मस्वस्त्ययनार्थेन सर्वैरेव दातव्यः [14] इति। वर्णेन ये उत्कृष्टास्तेषां (ब्राह्मणादीनाम्) अवरवर्णैः (क्षत्रियादिभिः) गन्तुं मार्गः दातव्यः- वर्णज्यायसां चेतरैर्वर्णैः [15] इति।

ब्राह्मणेन सह अभिषिक्तः राजा आगच्छति चेदपि ब्राह्मणायैव मार्गः दातव्यः इति, राजा ब्राह्मणमन्तरा आगच्छति चेत् तस्यैव मार्गः दातव्यः इति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रस्तूयते– समेत्य तु ब्राह्मणस्यैव पन्थाः [16], राज्ञः पन्था ब्राह्मणेनासमेत्य [17] इति। एवं मार्गे पालनीयाः धर्माः आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः प्रोक्ताः।

## 6. द्वितीयभार्यावरणे अवधेयाः अंशाः

यदि भार्या श्रौतगार्ह्यस्मार्तकर्मासु श्रद्धावती तथा पुत्रवती चेत् द्वितीयां भार्यां नोद्वहेदिति, उपर्युक्तयोः द्वयोः योग्यतयोः अन्यतराभावे तु अन्यां भार्यामुद्वहेदिति प्रस्तूयते– धर्मप्रजासम्पन्ने दारे नान्यां कुर्वीत, अन्यतराभावे कार्या प्रागग्न्याधेयात् [18] इति।

किञ्च, संशयास्पदविषयं प्रत्यक्षवत् निश्चितवत् न ब्रूयादिति आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः उच्यते– न संशये प्रत्यक्षवद् ब्रूयात् [19] इति।

### सन्दर्भाः


1. बौ. 1.8.16.1.
2. आप. 1.1.1.4. हि. 26.1.4
3. आप. 1.1.1.4. उज्वलावृत्तिः, हि. 26.1.4 वृत्तिः
4. आप. 1.1.1.5. हि. 26.1.5
5. आप. 2.2.4.25. उज्वलावृत्तिः, हि. 27.1.77 वृत्तिः
6. आप. 2.2.4.25. हि. 27.1.77
7. आप. 2.5.12.19. हि. 27.4.56
8. आप. 2.6.15.12. हि. 27.3.46
9. आप. 2.6.15.13. हि. 27.3.47
10. आप .2.1.2.2,3. हि. 27.1. 24,25
11. आप. 2.1.2.5. हि. 27.1.27
12. आप. 2.5.11.10, 11. हि. 27.4.25,26
13. आप. 2.5.11.7. हि. 27.4.23
14. आप. 2.5.11.9. हि. 27.4.24
15. आप. 2.5.11.8.
16. आप. 2.5.11.6. हि. 27.4.22
17. आप. 2.5.11.5. हि. 27.4.21
18. आप. 2.5.11.12, 13. हि. 27.4. 27, 28
19. आप. 2.5.12.21. हि. 27.4.58


### उपयुक्त ग्रन्थाः


1. आपस्तम्ब धर्मसूत्रम्
2. बौधायन धर्मसूत्रम्
3. हिरण्यकेशि धर्मसूत्रम्
4. संस्कृत साहित्येतिहासः
5. संस्कृत वाङ्म्यम्